# ॥ सरस्वतीसूक्तम् ॥

(ऋग्वेद संहिता)

ॐ इयमंददाद्रभसमृंणच्युतं दिवोदासं वध्र्यश्वाय दाशुषे। या शश्वन्तमाचखादावसं पणिं ता ते दात्राणिं तविषा सरस्वती ॥ १ ॥ इयं शुष्मेभिर्बिसखा इंवारुजत्सानुं गिरीणां तंविषेभिंरूर्मिभिः। पारावतघ्नीमवंसे सुवृक्तिभिः सरस्वती मा विंवासेमधीतिभिः ॥ २ ॥ सरस्वति देवनिदो नि बर्हय प्रजां विश्वंस्य बृसंयस्य मायिनः। उत क्षितिभ्योऽवनीरविन्दो विषमेभ्यो अस्रवो वाजिनीवति ॥ ३ ॥ प्रणो देवी सरंस्वती वाजेभिर्वाजिनीवती। धीनामंवित्र्यंवतु ॥ ४ ॥

यस्त्वा देवि सरस्वत्युपब्रूते धने हिते। इन्द्रं न वृंत्रतूर्ये ॥ ५ ॥ त्वं देवि सरस्वत्यवा वाजेषु वाजिनि। रदा पूषेवं नः सनिम् ॥ ६ ॥ उत स्या नः सरंस्वती घोरा हिरंण्यवर्तनिः। वृत्रघ्नी वंष्टि सुष्टुतिम् ॥ ७ ॥ यस्या अनन्तो अह्रुंतस्त्वेषश्चंरिष्णुरर्णवः। अमश्चरंति रोरुंवत् ॥ ८ ॥

सा नो विश्वा अति द्विषः स्वसॄरन्या ऋतावंरी। अतन्नहेव सूर्यः ॥ ९ ॥ उत नः प्रिया प्रियासुं सप्तस्वंसा सुजुंष्टा। सरंस्वती स्तोम्या भूत् ॥ १० ॥ आपप्रुषी पार्थिवान्युरु रजो अन्तरिंक्षम्।

सर॑स्वती नि॒दस्पा॑तु ॥ ११ ॥ त्रि॒ष॒धस्था॑ स॒प्तधा॑तुः पञ्च॑ जा॒ता
व॒र्धय॑न्ती । वाजे॑वाजे॒ हव्या॑भूत् ॥ १२ ॥

प्र या म॑हि॒म्ना म॒हिना॑सु॒ चेकि॑ते द्यु॒म्नेभि॑र॒न्या अ॒पसा॑म॒पस्त॑मा ।
रथ॑ इव बृह॒ती वि॒भ्वने॑ कृ॒तोप॒स्तुत्या॑ चिकि॒तुषा॒ सर॑स्वती ॥ १३ ॥
सर॑स्वत्य॒भि नो॑ नेषि॒ वस्यो॒ माप॑ स्फरीः॒ पय॑सा॒ मा न॒ आ ध॑क् ।
जु॒षस्व॑ नः स॒ख्या वे॒श्या॑ च॒ मा त्वत् क्षेत्रा॒ण्यर॑णानि गन्म ॥ १४ ॥